अरुणां करुणां तरंगिताक्षीं धृतपाशांकुशपुष्पबाणचापाम्।
अणिमादिभिरावृतां मयूखैरहमित्येव विभवयेद्भवानीं।।2।।

ध्यायेत्पद्मासनस्थां विकसितवदनां पद्मपत्रायताक्षीं,
हेमाभां पीतवस्त्रां करकलितलसद् हेमपद्मांबरांगीं।
सर्वालंकारयुक्तां सततमभयदां भक्तनम्रां भवानीं,
श्रीविद्यां शान्तमूर्तिं सकलसुरयुतां सर्वसंपत्प्रदात्रीं।।3।।

सकुंकुमविलेपनामलिकचुंबिकस्तूरिकां
समन्दहसितेक्षणां सशरचापपाशांकुशां।
अशेषजनमोहिनीमरुणमाल्यभूषाम्बरां
जपाकुसुमभासुरां जपविधौ स्मरेदम्बिकां।।4।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM